# नारायणीयसारसंग्रहः कृष्णीयम् ॥

DR. Anilkumar V.V.
Asst.Professor,Govt. Sanskrit College, Thripunithura

Submitted on: 03/11/2019 Revised on:10/12/2019 Accepted on: 11/12/2019

संस्कृतसाहित्यचरित्रे स्तोत्रसाहित्यस्य अनुपमं स्थानं वर्तते । भिन्नभिन्नदेवतानां माहात्म्यवर्णनाय कवयः अनेकान् स्तोत्रग्रन्थान् अरचयन् | वैष्णवस्तोत्राणि, देवीस्तोत्राणि,शिवस्तोत्राणि, गणपतिस्तोत्राणि, सुब्रह्मण्यस्तोत्राणि च स्तोत्रसाहित्ये प्रथितानि | अष्टक - दशक- पञ्चक - शतक -साहस्रीप्रभेदैः स्तोत्रसाहित्यं परिपुष्टं भवति। सर्वेष्वपि देशेषु प्रमुखदेवतामाहात्म्यप्रकीर्त्यर्थं स्तोत्रकाव्यानां निर्माणं कविभिः कृतं दृश्यते । केरलदेशे अपि तादृशं प्रथितं स्तोत्रकाव्यं भवति नारायणभट्टतिरिणा विरचितं नारायणीयम् नाम श्रीकृष्णस्तोत्रम् | काव्यप्रयोजनेषु अन्यतमस्य शिवेतरक्षतिर्नाम अमङ्गलदूरीकरणफलप्राप्तये, स्वीयवातरोगनिवृत्यर्थं भट्टतिरिणा गुरोः उपदेशेन गुरुवायूर्देशमागत्य तत्रस्थं वातालयेश्वरं श्रीकृष्णं अनन्यशरण्यतया उपास्य नारायणीयं निर्माय रोगात् विमुक्तोऽजनि इत्यैतिह्यः । श्रीमद् भागवतपुराणस्य सारसंग्रहरूपं भवति श्रीमन्नारायणीयमिति भक्तजनानां विश्वासः, पण्डितानां सम्मतिश्च। तद्वत् संगमेश्वरप्रसादाय उण्णायिवार्यर् महाशयेन रामपञ्चशतिं विरचयामास | लीलाशुकेन श्रीकृष्णकर्णामृतं नाम स्तोत्रं वातालयेशप्रीत्यर्थं निर्मितम् । एतत् कवित्रयं श्रीशङ्करानन्तरकालीनकेरलसंस्कृतकाव्यसाहित्यमण्डले प्रसिद्धम् अभवत् । अनन्तरकालीनेषु स्तोत्रग्रन्थेषु अन्यतमं भवति कृष्णीयम् नाम काव्यतल्लजम् । कृतिरियं नारायणीयाख्यस्य सारसंग्रहमिति अत्र विचिन्त्यते।

## कृष्णीयम्

कृष्णीयनामकस्य अस्य ग्रन्थस्य प्रणेता कः इत्यस्मिन् विषये पण्डितैः अज्ञानकर्ता इत्यनेन कर्तृत्वनिर्णये वैषम्यमुपस्थापितम् । ग्रन्थे कर्तुः नाम न अङ्कितं दृश्यते। भागवतपुराणविषयसंग्रहस्वरूपेण विद्यमानं नारायणीयम् पुरस्कृत्यैव ग्रन्थरचना इति सोद्देशः ग्रन्थकर्तृणा ग्रन्थावसाने प्रस्तावितः । यथा :-

नारायणाख्यकविराजकृतातिरम्य
नारायणीयमुखनुत्यनुसारतोऽयम् ।
नारायणस्य करुणां तव लब्धुकामो
मूढोऽप्यहं नुतिमकार्षमिमां क्षमेथाः॥ (कृष्णीयम् 41.11 )

तेन प्रकारेण नारायणीयं नारयणभट्टपादेन कृतं तेनैव प्रकारेण कृष्णीयं मया क्रियते इत्याशयः तत्र सुव्यक्तं भवति। तथा वातालयेश्वरस्य करुणामपि सः प्रार्थ्यते । अतः भागवतपुराणसारस्य नारायणीय काव्यस्य सारसंग्रहत्वेन कृष्णीयरचना इत्यनुमन्तुं शक्यते । ग्रन्थस्य कृष्णीयमिति संज्ञायाः साङ्गत्यमपि तत्र प्रदर्शितम् । यथा:-

"कृष्णावतारप्राधान्यात् कृष्णीयमिति विश्रुतम्।
कृष्णस्तोत्रं तवैतत् तु पुष्णीयाज्जपतां फलम्॥" इति ।

नारायणकर्तृत्वद्वारा नारायणवर्णनाद्वारा च नारायणीयमिति यथा भट्टपादग्रन्थस्य संज्ञा, तद्वत् केनापि कृष्णनामकेन कविना श्रीकृष्णप्रीत्यर्थं विरचितस्य ग्रन्थस्य कृष्णीयमिति नाम स्यात् इति केचन भागवतकाराणामाभिप्रायः अत्र स्मरणीयमेव।

## ग्रन्थस्वरूपम्

काव्येऽस्मिन् चतुश्शताधिकेकोनचत्वारिंशत् श्लोकाः सन्ति। ते च एकचत्वारिंशदध्यायत्वेन विभक्ताः भवन्ति अध्यायस्य च स्तबकमिति संज्ञा तत्र स्वीकृतः । केषुचित् स्तबके दशश्लोकाः केषुचित् एकादशश्लोकाः, केषुचित् द्वादशश्लोकाः च विद्यन्ते। अन्तिमे तावत् त्रयोदशश्लोकाः।

अत्र विषयवर्णनायां कविः भिन्नभिन्नछन्दसामुपयोगः स्वीकृतः इत्यवगम्यते । प्राथमिकेषु एकत्रिंशदध्यायेषु स्रग्धरावृत्तम् उपयुक्तम्, तदनन्तरं चत्वारिंशदध्यायपर्यन्तं वसन्तिलकम्, एकचत्वारिंशे मालिनी, वसन्तमालिका, आर्या, शङ्करचरितं, पुषिताग्रा, इन्दुवदना, शार्दूलविक्रीडितम् ,वसन्ततिलकं, तथा अनुष्टुप् वृत्तं च प्रयुक्तम् ।

## नारायणीयस्य कृष्णीयस्य च विषयसादृश्यविचिन्तनम्

" सच्चित्सन्तोषपूर्णात्मकमखिलपरिव्याप्तमाद्यन्तहीनं
निर्द्वन्द्वं विश्वकन्दं परमसुखदमन्विष्यमाणं त्रयीभिः।
शुद्धं देहेन्द्रियाद्यैर्विरहितमपि यत् तत् परं ब्रह्म तावद्
भक्तानां मूर्तिमत्भात्यहह गुरुमरुत्पत्तनेऽनुग्रहार्थम्॥"

कृष्णीयस्य प्रथमश्लोकोऽयम्। अस्मिन् नारायणीयप्रथश्लोकस्य पूर्णतया पुनराविष्कारः दृश्यते । "साक्षात्गुरुपवनपुरे हन्त भाग्यं जनानां "- इत्येददाशयः- अहह गुरुमरुत्पत्तने इत्यनेन स्फुटीकृतम् । विमर्शनात्मकतया विचार्यमाणे सति नारायणीयप्रभावेनैव कृष्णीयकाव्यमिति अवगन्तुं शक्यते। नारयणभट्टतिरिः विश्वपीडापहत्यर्थं भगवन्तं प्रार्थयते।

यथा:-

एते तावद्वयन्तु स्थिरतरमनसा विश्वपीडापहत्यै।
निश्शेषात्मानमेनं गुरूपवनपुराधीशमेवाश्रयामा। इति ॥ (नारायणीयम् -1.2 )

कृष्णीये तु :-

एनं निश्शेषमूलं निखिलभयहरं शुद्धसत्त्वैकरूपम्
तापापायाय सेवे गुरुपवनपुराधीशमेवाशु भक्त्या।। ( कृष्णीयम् -1.2 )

आध्यात्मिकादित्रिविधदुःखनिवृत्तिरेव अत्र प्रार्थयते। किन्तु इतरविषयाणां त्यागोऽपि ग्रन्थकर्तृणा कृतो दृश्यते। केवलं श्लोकद्वयेण प्रथमदशकस्य वर्णनासंगृह्यते। भक्तिप्रार्थना एव काव्यस्य मुख्यो विषयः। श्रीकृष्णं प्रार्थयति मेल्पत्तूर् यथा तृतीये दशके सर्वेन्द्रियाणां साफल्यं भगवद्दर्शनस्पर्शनस्मरणकीर्तनादिना भवितव्यमिति मत्वा एवं प्रार्थयति।

विधूय क्लेशान् मे कुरु चरणयुग्मं धृतरसं
भवत्क्षेत्रप्राप्तौ करमपि ते पूजनविधौ।
भवन्मूर्त्यालोके नयनमथ ते पादतुलसी
परिघ्राणे घ्राणं श्रवणमपि ते चारुचरिते।। (नारायणीयम्- 3.7)

कृष्णीये तु आशयोऽयं एवं प्रकारेण विद्यते। यथा-

भूमंस्त्वत्क्षेत्रगत्यां मम घृतकुतुकं पादयुग्मं कुरु त्वं
पाणिं तावत्कपूजाकुसुमभृतिविधावीक्षणे वीक्षणे ते।
मूर्तेघ्राणं च तावत् तव पदतुलसीसौरभस्यानुभूत्यां
श्रोत्रं श्रोत्राभिरामे तव खलु चरिते त्वस्तुतावेव जिह्वाम्।। (कृष्णीयम् 1.6)

रामावतारप्रस्तावो यथा नारायणीये
गीर्वाणैरर्थ्यमानो दशमुखनिधनं कोसलेष्वृष्यशृङ्गे
पुत्रीयामिष्टिमिष्ट्वा ददुषि दशरथाक्ष्माभृते पायसाज्यम्।
तद्भुक्त्या तत्पुरन्ध्रीष्वपि तिसृषु समं जातगर्भासु जातो
रामस्त्वं लक्ष्मणेन स्वयमथ भरतेनापि शत्रुघ्ननाम्ना ॥ (नारायणीयम् -34.1)

कृष्णीये-

भूमन् देवार्थितस्त्वं दशमुखनिधनं कर्तुमंशैः स्वकीयैः
जातः श्रीरामनामा दशरथतनयः ............इत्यनेन।। ( कृष्णीयम् 11.1)

श्रीकृष्णस्य गोकुलानयन विषयः नारायणीये

त्वत्प्रेरितस्तदनु नन्दतनूजया ते

व्यत्यासमारचयितु स हि शूरसूनुः ।
त्वां हस्तयोरधृत चित्तविधार्यमार्यैः
अम्भोरुहस्थ कलहंसकिशोररम्यम्।। (नारायणीयम्- 38.8 )।।

कृष्णीये

व्यत्यासं कर्तुकामस्तदनु तव पिता नन्दपुत्र्या त्वदुक्त्या।
हस्ते संगृह्य च त्वां स्वयमिह विवृतं द्वारदेशं व्यतीतः।। ( कृष्णीयम् - 12.7 )

भक्तिमहत्ववर्णनाख्ये एकनवत्यध्यायस्य प्रथमश्लोकः-

श्रीकृष्ण! त्वनत्पदोपासनमभयतमम्।। (नारायणीयम्- 91.1)

कृष्णीये- कृष्ण त्वदंघ्रिभजनं भयहारि मन्ये ।। ( कृष्णीयम्- 32.1)

भीर्तिनाम द्वितीयात् भवति ननु मनः कल्पितं च द्वितीयम्।।(नारायणीयम्- 91.3)

कृष्णीये

भीरन्यतोऽस्ति ननु मानसकल्पितोऽन्यत्। ( कृष्णीयम् -32.3 )

एवं नारायणीयप्रतिपाद्यार्थानां समग्रतया स्फूर्तिः कृष्णीये प्रतिभाति इति निस्संशय एव।

**उभयोग्रन्थयोर्मिथः काचन साजात्यसङ्गतिः**

1. नारायणीये मेल्पत्तूर वैदिकनिन्दापरिकल्पितोपाख्यानानां पुरञ्जनोपाख्यानजडभरतोपाख्यानादीनां उपेक्षा यथा अकरोत् तेनैव मार्गेण विष्णुमहत्वोपस्थापनाय कृतस्य नारायणीयस्य नवतितमाध्यायस्य त्यागः कृष्णीयकारश्चाकरोत् I
2. नारायणीये भागवतपुराणकथानां क्रमो न स्वीकृतः किन्तु कृष्णीये नारायणीयक्रममनुसृत्यैव प्रतिपादनरीतिमवलम्बितः इत्यवगम्यते।
3. वैदिकधर्ममहत्वनिर्धारणमपि स्वीयकर्तव्यमिति नारायणीयकारः अचिन्तयत् । किन्तु कृष्णीये भक्तिप्रार्थना एकैव मुख्यविषयः।
4. नारायणप्रतिपाद्यविषयत्वात् नारायणीयमिति यथा तथा कृष्णावतारप्राधान्यात् कृष्णीयमिति प्रसिद्धिः।
5. आयुरारोग्यसौख्यम् एव ग्रन्थप्रयोजनमिति नारायणीये, 'पुष्णीयात् जपतां सुखम्' इति कृष्णीये च ग्रन्थाध्येतॄणां कृते फलं निर्दिष्टम्।

एवं समग्रतया उभयोः ग्रन्थयोः विषयविश्लेषणे यत् साजात्यं वरीवर्ति तत् जनानां मनसि न विद्यते। कुतश्चेत् कृष्णीयस्य अप्रसिद्धत्वात्। नारायणीयं सार्वभौमप्रसिद्धम्। अतः कृष्णीयस्य महत्वं सहृदयसमक्षं प्रकाशनाय मदीयं प्रयासः।